✧˖°*❋ ❋*°˖✧

# द्वादश ज्योतिर्लिङ्ग स्तोत्रम्
# (Dwadash Jyotirlinga Stotram)
## in Bangla

## দ্বাদশ জ্যোতির্লিংগ স্তোত্রম্

✧˖°*❋ ❋*°˖✧

# দ্বাদশ জ্যোতির্লিংগ স্তোত্রম্

## সংপূর্ণ স্তোত্রম্

সৌরাষ্ট্রদেশে বিশদেঽতিরম্যে জ্যোতির্ময়ং চংদ্রকলাবতংসম্ ।
ভক্তপ্রদানায কৃপাবতীর্ণং তং সোমনাথং শরণং প্রপদ্যে ॥ 1 ॥

শ্রীশৈলশৃংগে বিবিধপ্রসংগে শেষাদ্রিশৃংগেঽপি সদা বসংতম্ ।
তমর্জুনং মল্লিকপূর্বমেনং নমামি সংসারসমুদ্রসেতুম্ ॥ 2 ॥

অবংতিকাযাং বিহিতাবতারং মুক্তিপ্রদানায চ সজ্জনানাম্ ।
অকালমৃত্যোঃ পরিরক্ষণার্থং বংদে মহাকালমহাসুরেশম্ ॥ 3 ॥

কাবেরিকানর্মদযোঃ পবিত্রে সমাগমে সজ্জনতারণায ।
সদৈব মাংধাতৃপুরে বসংতং ওংকারমীশং শিবমেকমীডে ॥ 4 ॥

পূর্বোত্তরে প্রজ্বলিকানিধানে সদা বসং তং গিরিজাসমেতম্ ।
সুরাসুরারাধিতপাদপদ্মং শ্রীবৈদ্যনাথং তমহং নমামি ॥ 5 ॥

যং ডাকিনিশাকিনিকাসমাজে নিষেব্যমাণং পিশিতাশনৈশ্চ ।
সদৈব ভীমাদিপদপ্রসিদ্ধং তং শংকরং ভক্তহিতং নমামি ॥ 6 ॥

শ্রীতাম্রপর্ণীজলরাশিযোগে নিবধ্য সেতুং বিশিখৈরসংখ্যৈঃ ।
শ্রীরামচংদ্রেণ সমর্পিতং তং রামেশ্বরাখ্যং নিযতং নমামি ॥ 7 ॥

যাম্যে সদংগে নগরেঽতিরম্যে বিভূষিতাংগং বিবিধৈশ্চ ভোগৈঃ ।
সদ্ভক্তিমুক্তিপ্রদমীশমেকং শ্রীনাগনাথং শরণং প্রপদ্যে ॥ 8 ॥

সানংদমানংদবনে বসংতং আনংদকংদং হতপাপবৃংদম্ ।
বারাণসীনাথমনাথনাথং শ্রীবিশ্বনাথং শরণং প্রপদ্যে ॥ 9 ॥

সহ্যাদ্রিশীর্ষে বিমলে বসংতং গোদাবরিতীরপবিত্রদেশে ।
যদ্দর্শনাত্ পাতকং পাশু নাশং প্রযাতি তং ত্র্যংবকমীশমীডে ॥ 10 ॥

মহাদ্রিপার্শ্বে চ তটে রমংতং সংপূজ্যমানং সততং মুনীংদ্রৈঃ ।
সুরাসুরৈর্যক্ষ মহোরগাঢ্যৈঃ কেদারমীশং শিবমেকমীডে ॥ 11 ॥

ইলাপুরে রম্যবিশালকেঽস্মিন্ সমুল্লসংতং চ জগদ্বরেণ্যম্ ।
বংদে মহোদারতরস্বভাবং ঘৃষ্ণেশ্বরাখ্যং শরণং প্রপদ্যে ॥ 12 ॥

জ্যোতির্ময়দ্বাদশলিংগকানাং শিবাত্মনাং প্রোক্তমিদং ক্রমেণ ।
স্তোত্রং পঠিত্বা মনুজোঽতিভক্ত্যা ফলং তদালোক্য নিজং ভজেচ্চ ॥ 13 ॥

## লঘু স্তোত্রম্

সৌরাষ্ট্রে সোমনাধংচ শ্রীশৈলে মল্লিকার্জুনম্ ।
উজ্জযিন্যাং মহাকালং ওংকারেত্বমামলেশ্বরম্ ॥
পর্ল্যাং বৈদ্যনাধংচ ঢাকিন্যাং ভীম শংকরম্ ।
সেতুবংধেতু রামেশং নাগেশং দারুকাবনে ॥
বারণাশ্যাংতু বিশ্বেশং ত্রযংবকং গৌতমীতটে ।
হিমালযেতু কেদারং ঘৃষ্ণেশংতু বিশালকে ॥

এতানি জ্যোতির্লিংগানি সাযং প্রাতঃ পঠেন্নরঃ ।
সপ্ত জন্ম কৃতং পাপং স্মরণেন বিনশ্যতি ॥

✧˳·˖✶ ❋ ❋ ✶˖·˳✧